**अन्वेष्टव्यत्वासिद्धि** (anveṣṭavyatvāsiddhi) *f.* non-establishment of the state of being what is to be sought, i.e. aimed at कथमन्वेष्टव्यत्वासिद्धिरित्यत्राह ŚrutaPra. ii.145.31 (*on* i.4.19)

**अन्वेष्टव्यभेद** (anveṣṭavya-bheda) *m.* particular type of (individual) who is to be inquired or asked जातिः प्राणप्रदात्री गुण इह तदनुप्राणिते भेदकं(कः) स्यादित्याहुः केऽपि नेत्थं नियतिरुभयथाप्यर्थदृष्टेर्निशादौ। तेनान्वेष्टव्यभेदप्रतिनियतिमता केनचिन्नित्यरूप्यम् TattvMu. 5.112 (comm. विवेचनीयव्यक्तिविशेषे)

**अन्वेष्टव्यान्तर** (anveṣṭavyântara) *n.* another thing what is to be sought, i.e. aimed at परस्मिन्नन्वेष्टव्यान्तरप्रतीत्यनुपपत्तेः तदर्थम् अन्वेष्टव्यान्तरनिर्देशः किं दहराकाशस्य परमात्मत्वविरोधि उत न ŚrutaPra. ii. 31.9-11 (*on* i.3.13)

**अन्वेष्टुकाम** (anveṣṭu-kāma) *adj.* desirous of searching or finding out तत्र प्रलीनात्मनः प्रतिपक्षभूपालानन्वेष्टुकामास्त्रिलिङ्गसैनिकाः ... सर्वतः पर्यटन्ति स्म PratāYaBhū. 187.1.

**अन्वेष्टुम्** (ánv-eṣṭum) *inf.* **1** to seek, to seek after **2** to search, to look for, to find out **3** to ask, to inquire **4** to know, to realise, to ascertain **1** to seek, to seek after (अग्निषोमयोः) तयोर्यत्प्रियं धामासीत्तदपन्यदधातां तद्देवा अन्वेष्टुमध्रियन्त KāṭhS. 24.7 (ii.97.23); KapiKaS. 37.8 (203.2); पालिश्रियमिवान्वेष्टुमागतैः ... मरालपत्रिभिः शोभितसरोवरः ... आजगाम ... शारदः कालः UdaySuKa. 26.7; ज्ञानेन मन्त्रिणो गतिमन्वेष्टुं प्रवृत्तः PurāPraSaṁ. 69.2; **2** to search, to look for, to find out वृष्टिर्वै देवेभ्योऽपाक्रामत् सैषु लोकेष्वश्रयत तां देवा अन्वेष्टुमध्रियन्त KāṭhS. 30.4 (ii.185.15); KapiKaS. 46.7 (281.23); (ऋषयः यज्ञम्) तमन्वेष्टुं दध्रिरे ŚatBr. I.vi.2.2; इन्द्रः ... पुराः परावतो जगाम। ... तमन्वेष्टुं दध्रिरे। अग्निर्देवतानां हिरण्यस्तूप ऋषीणां बृहती छन्दसाम् ŚatBr. I.vi.4.2; किमिच्छन्ती पणिभिरसुरैर्निरूळहा गा अन्वेष्टुं सरमां देवशुनीमिन्द्रेण प्रहितामयुग्भिः पणयो मित्रीयन्तः प्रोचुः SarvaAnu. 10.108 (42.11); तामन्विच्छन् (v.l. न्वेष्टुम्) स नृपतिः परिचक्राम MahāBhā. i.160.40; वैदर्भि ...। भीमस्य वचनाद्राज्ञस्त्वामन्वेष्टुमिहागतः MahāBhā. iii.65.27; वीरद्युम्न इति ख्यातो राजाहम् ...। भूरिद्युम्नं सुतं नष्टमन्वेष्टुं वनमागतः MahāBhā. xii.126.27; अहम् ...। तं देशं प्रणमित्वाथ अन्वेष्टुमुपचक्रमे। ... तं देवम् MahāBhā. xiii. App.I. 3A (299); ततो रावणनीतायाः सीतायाः शत्रुकर्शनः। इयेष पदमन्वेष्टुम् Rāmā. v.1.1; पूर्वं गतास्त्येका ...। पुलस्त्यस्याश्रमं दिव्यमन्वेष्टुं स्वसखीजनम् Rāmā. vii.2.21; त्वाम्। उपागतोऽन्वेष्टुमहं विहंगरूपेण KumāSaṁ. 9.9; प्रस्थितौ व्यवहारकारणाय (v.l.अन्वेष्टुं प्रस्थितावुभौ) PañcT. 3.47 (1)(305.3); अवनिपालः ...। अन्यस्मिंश्चाहनि हयैरेव स्वसारमन्वेष्टुमुच्चचाल HarṣaC. 303.24; 320.20; जीमूतवाहनस्य वार्तामन्वेष्टुं प्रेषितोऽस्मि महाराजविश्वावसुना Nāgā. 5.3 (8); जनपदगामिनं मार्गमन्वेष्टुमुद्युक्तया मया ... कुमारोऽप्यनायि DaśKuC. 9.10; मित्रगणः ... देवमन्वेष्टुमगच्छत् DaśKuC. 19.10; (विमुचिः) सान्त्वयित्वा तया सार्धमुर्वी चान्वेष्टुमुद्यतः PadmP. (Ra.) 30.120; सीतामन्वेष्टुमनुदिशमभिदुद्रुवुः कपिपुङ्गवाः MahāvīC. 6.3(4); अयमहं सीतादेव्याः प्रवृत्तिमन्वेष्टुं प्रहित्य हनूमन्तम् ... अङ्गदमभिषेक्ष्यामि AnargharRā. 5.53 (11); महेन्द्रस्य गिरेः शृङ्गात् प्लवङ्गो हनुमानहम्। उल्लङ्घिताब्धिर्वैदेहीं त्वां चान्वेष्टुमिहागतः RāmC. 21.96; सः ... विद्विषां दरीषु ... ददर्श तौ गणः। असूनिवान्वेष्टुममुष्य चक्षुषोर्मनस्विनौ बभ्रमतुर्मनःस्वपि RāghPān. (Dha.) 6.11; मन्दविसर्पो नाम सर्पः। सोऽतिजीर्णतयाहारमप्यन्वेष्टुमक्षमः Hitopa. 4.65 (3); असौ मामन्वेष्टुमायाति SubhaDha. 2.13 (7); विवेश दानवपतिरन्वेष्टुं मधुसूदनम् (माधवम्) VāmaP. 77.10; अस्ति ... मैनाकमन्वेष्टुमन्तः प्रविष्टहिमवतेव महता खातवलयेन वेष्टिता ... अयोध्येति ... नगरी TilaMañ. 8.3; आत्मवपुषः षोडशीं कलामन्वेष्टुमिव मथनदृष्टदिव्याश्वशशिखण्डसंभवाभ्यामहिमहिमगभस्तिभ्यामनवरतकृतमज्जनोन्मज्जनम् ... अम्भोनिधिमपश्यम् TilaMañ. 121.8; सोऽयमहारि हरिणा हयः। ततस्तं नष्टमन्वेष्टुं सौमतेयाः प्रतस्थिरे RāmāCam. 1.68; यन्निमज्जति मच्चेतः कुतूहलरसोर्मिषु। मार्गमन्वेष्टुमेतस्य तदेहि प्रयतावहे NavaSāC. 2.51; तामन्वेष्टुं प्रविष्टेन कुतूहलबलादिह ... दृष्टं धाम हिरण्यम् NavaSāC. 11.104; मन्ये भवन्तमन्वेष्टुं सापि स्वयमितो गता (सीता) RāmāMañ. 155.16; न दिशं तस्य स्थानं वा पापकर्मणः। जाने किंतु तमन्वेष्टुमश्रान्तोऽयं ममोद्यमः RāmāMañ. 174.10; 189.12; बभौ स कान्तः ... कुन्तलसंचयेन। अन्वेष्टुमिष्टां मुकुटेन्दुलेखां निशागणेनेव समागतेन DarpaDa. 7.36; अगस्त्यमन्वेष्टुमायातो विन्ध्यभूधरः BṛKathāMañ. ii.2.148; त्वामन्वेष्टुं समायातो दृष्ट्वा नाहुषमुत्तमम् PadmP. ii.64.20; अहं वै हनूमान्नाम ...। रामदासत्वमापन्नोऽन्वेष्टुं सीतां समागतः BṛDharmaP. i.20.20; त्वां पितान्वेष्टुं गतः चिरात् GaṇeP. i.76.28; तं नष्टमिष्टं मृगम्। अन्वेष्टुं यमुनातटीमुपगता DaśāvaC. 8.78; 8.533; पुत्रो मे प्रोषितः क्वापि तमन्वेष्टुं व्रजाम्यहम् KathāSaSāg. i.7.79; ततस्तान्सुहृदोऽन्वेष्टुं स्वगृहाभिमुखं ययौ KathāSaSāg. ii.2.54; ix.6.21; xii.7.138; त्रिभुवनमल्ल इत्युदारः। यातोऽत्वै(न्वे)ष्टुं जनकजनिताम् EI.xii.278.95; xii.153.54; सनत्कुमारमन्वेष्टुं स विष्वक् तामगाहत (महाटवीम्) TriṣaŚaPuC. iv.7.117; कुमारस्ताः पणाङ्गनाः। नष्टस्वः स्वमिवान्वेष्टुमुपाक्रंस्त ... वने PariPar. 1.161; खे ... अमिलन् ...। मालावतोऽन्वेष्टुममायिनो भटानमायिका नव्यवरान्नभश्चराः DvyāśraKā.18.63; एवमाप्तान्परान्पुत्रमन्वेष्टुं प्राहिणोन्नृपः RājTa. (Ka.) 7.1596; पुत्रयोग्यां दारिकामन्वेष्टुमहमागतः Pañcā. 105.18; मन्थरकहिरण्यौ लघुपतनकं प्रत्युक्तवन्तौ। भद्र। अशक्तावावां मन्दगतितया तं प्रियसुहृदम् अन्वेष्टुम् Pañcā. 167.18; किमप्यन्वेष्टुमद्याप्याक्षेपः क्षमापतेः MohaRāPa. 3.44 (8); अन्वेष्टुं शकुनान् प्रातः पुराद् बहिरहं गतः PārśvC. 2.306; पल्लिपतिस्तु तत्। निजान्धरणमन्वेष्टुं प्रैषीत्प्राप्तस्तु नैव सः SamarāSaṁ. 6.87; हुताशः कदाचित् तिरोभूत् क्रुद्धोऽन्वेष्टुं प्रणुन्ना दिगधिपकरिणो ब्रह्मणा वह्निमेनम् MātaLī. 1.36; पाण्ड्यं मग्नं पयोनिधौ। अन्वेष्टुमिव तद्योषिदश्रुधारापगायते PratāYaBhū. 242.4; 318.11; तामेव देवीमन्वेष्टुमागतोऽस्मि ViviTīKa. 63.20; PrabaK. 71.29; शिवस्य पादावन्वेष्टुं शार्ङ्गर्यशक्तः PañcDa. 6.118; भार्या हृता सीता रक्षसा केनचिन्मम। तामन्वेष्टुमिहायातौ AdhyāRā. iv.1.20; नलमन्वेष्टुम् ...। विपिनं प्रविवेश (दमयन्ती) Nalābhyu. 7.57; तत् श्रुत्वा। स श्रीपार्श्वनाथप्रतिमामन्वेष्टुमारेभे PurāPraSaṁ.91.21; आजग्मुस्त्वरितास्तत्र तानन्वेष्टुम् BṛBrahmaS. i.5.111; (मारीचम्) तदेनमन्वेष्टुमुपसर्पतापि मया महेन्द्रशैलेऽयमासादित एव JānaPa. 3.6(1); सीतामन्वेष्टुं द्रुतमुपचक्रमे हनूमान् Rāgh. 12.58; सहस्रभानुः। अन्वेष्टुमन्धतमसं गहनेषु लीनमारोहतीति गगनाग्रमयं प्रतीमः Mukundā. 157; **3** to ask, to inquire आश्चर्याणि बहूनीह भवन्त्यस्याश्रमे मुनेः। न तु कौतुहलाद्युक्तमन्वेष्टुं तं महामुनिम् Rāmā. vii.71.24 (Bombay ed.) (*but* Rāmāyaṇaśiromaṇiṭīkā बोधयितुम्); **4** to know, to ascertain (विष्णुम्) न चैनं शेकुरन्वेष्टुं कर्मतो जन्मतोऽपि वा HariVaṁ. 40.18; अत्र तु नेति सर्वस्य च तत्तदसाधारणं रूपमन्वेष्टुं शक्यमेव NyāyKu. 72.14; यदि स्त्रीचरितं वेत्सि तदा वामं पादं प्रक्षालयामि। नृपस्तमन्वेष्टुं चचाल PurāPraSaṁ. 4.15; 4.16.

**अन्वेष्टृ** (anv-eṣṭṛ) *adj.* **1** who searches or looks for or finds out अनुपद्यन्वेष्टा P.v.2.90; CāndrVyā. iv.2.95; SaraKaṇṭhā. (Gr.) v.2.120; SiddhaHe. vii.1.170; अन्वेष्टारो ब्राह्मणाश्च भ्रमन्ति शतशो महीम् MahāBhā. iii.308*; अनुपदीति निपात्यतेऽन्वेष्टा चेत्स भवति KāśiVṛ. *on* v.2.90; अन्वेष्टारस्तु तां प्रति प्रभूताः प्रहिता जना नाद्यापि निवर्तन्ते HarṣaC. 303.1; सर्वमात्मपदातिबलमवनिपालसूनोरन्वेष्टारमादिष्टवान् (समरकेतुः) TilaMañ. 188.11; 334.1; अन्वेष्टर्यनुपदीति निपात्यते Prasā.i.884.9; अनुपदमन्वेष्टा अनुपदी गवाम् SiddhāKau. 302B.13 (*on* v.2.90) [अन्वेष्टानुपदी प्रोक्तः AbhidhāRaMā. 2.225; अन्वेष्टा स्यादनुपदी Vaija. 203.27; AbhidhāCin. 491]; **2** (used as noun) (one) who seeks, i.e. who aims at अन्वेष्टव्यः परमात्मान्वेष्टुः .. न भिन्नः VedāntKa. 95.20 (*on* i.1.4); **3** who asks, who inquires स्त्रीकामो द्रव्यकामो वर्तनकामो वायं केन सह वा गतो वा सा च स्त्री कस्येत्यादि तत्रस्थं जनम् अन्वेष्टा राजपुरुषः शनैर्मधुरभाषा पृच्छेत् DīpKa. 72.2 (*on* 2.281)

**अन्वेष्य** (anveṣ-ya) *ger.* **1** having searched, looked for or found out स वत्सो गवाश्वाजमहिषमण्डलेषु यत्र क्वचन गतां गामन्वेष्य तामेव तर्पयति VaikhāGS. 5.15 (88.2); तत्तावदन्वेष्य मिथुनं मिथः संयोजनीयं भवति TilaMañ. 113.2; **2** having considered वाणिज्यसदृशो तत्रान्वेष्याल्पभूरिता। बहुना हि पराभूतिः क्रियतेऽल्पस्य वस्तुनः PadmP.(Ra.)14.91; **3** having sought समृद्धिमन्वेष्य च कालियस्य प्रास्थापयन्मां मुदितो नरेन्द्रः BṛKathāŚloSaṁ. 27.57.

**अन्वेष्य** (anv-eṣya) *adj.* [*f.* –ā] **1** to be searched, looked for or found out **2A** to be sought **B** to be sought, i.e. aimed at **3A** to be considered **3Bi** to be known, i.e. to be explained **Bii** to be known, to be realised **4** to be obtained, i.e. to be recovered **5** to be examined or investigated **1** to be searched, looked for or found out अन्वेष्या महिषी सीता राघवस्य Rāmā.iv.841* (3); सिद्ध्यर्थं हि प्रकरणाद्यन्वेष्यम् Bṛha. 6.14 (*on* i.1.1); अन्वेष्यः सह वैदेह्या रावणो राक्षसाधिपः Rāmā. iv.915*; अवगतश्च प्रयोगोऽनुष्ठेयः। गुणान्तराणि चान्वेष्याणि BālaKrī. i.11.19 (*on* 1.4-5); निषादात्तस्यामेवाहिण्डकस्तस्य वृत्तिरेषैव अन्वेष्या वा ManuBh. ii.342.17 (*on* 10.37); भृत्यो हरिशिखस्य ...। सः चावश्यं मयान्वेष्यः सुहृद्वार्त्तोपलब्धये BṛKathāŚloSaṁ. 25.6; तदिदानीं मयान्वेष्यः स्वयं गत्वा विभीषणः PadmP. v.35.12; स्वल्पेनापराधेन कुपितेह क्वचित् स्थिता। अन्वेष्या ... सा राजपुत्रवधूः KathāSaSāg. xiv.1.32; याचितं दास्यते वाथ तदान्वेष्यं छलान्तरम् TriṣaŚaPuC. iv.2.230; (जयापीडो राजा) सोऽन्वेष्यश्चेत्स्वयं प्राप्तः RājTa. (Ka.) 4.463; पद्धतिकारैर्विलिख्यमानेऽन्तर्नवयोनिन्यासे तन्त्रान्तरं मूलमन्वेष्यमिति दिक् SetuBa. 303.3; **2A** to be sought परुषे हितमन्वेष्यम् ...। मधुरे शाठ्यमन्वेष्यम् Tantrākhyā. 43.25; PañcT. 1.143 (147.12); तत्संस्पर्शे